All PDF Collection
PDF Seva

Devistuti ShakrAdaya or Mahishantakarisuktam )

# શક્રાદયકૃતા દેવીસ્તુતિઃ અથવા મહિષન્તકરીસૂક્તમ્

દુર્ગા સપ્તશત્યાન્તર્ગતમ્

॥ અથ ચતુર્થોઽધ્યાયઃ ॥

ઋષિરુવાચ ॥ ૧॥

શક્રાદયઃ સુરગણા નિહતેઽતિવીર્યે
તસ્મિન્દુરાત્મનિ સુરારિબલે ચ દેવ્યા ।
તાં તુષ્ટુવુઃ પ્રણતિનમ્રશિરોધરાંસા
વાગ્ભિઃ પ્રહર્ષપુલકોદ્ગમચારુદેહાઃ ॥ ૨॥

દેવ્યા યયા તતમિદં જગદાત્મશક્ત્યા
નિશ્શેષદેવગણશક્તિસમૂહમૂર્ત્યા ।
તામમ્બિકામખિલદેવમહર્ષિપૂજ્યાં
ભક્ત્યા નતાઃ સ્મ વિદધાતુ શુભાનિ સા નઃ ॥ ૩॥

યસ્યાઃ પ્રભાવમતુલં ભગવાનનન્તો
બ્રહ્મા હરશ્ચ ન હિ વક્તુમલં બલં ચ ।
સા ચણ્ડિકાખિલજગત્પરિપાલનાય
નાશાય ચાશુભભયસ્ય મતિં કરોતુ ॥ ૪॥

યા શ્રીઃ સ્વયં સુકૃતિનાં ભવનેષ્વલક્ષ્મીઃ
પાપાત્મનાં કૃતધિયાં હૃદયેષુ બુદ્ધિઃ ।
શ્રદ્ધા સતાં કુલજનપ્રભવસ્ય લજ્જા
તાં ત્વાં નતાઃ સ્મ પરિપાલય દેવિ વિશ્વમ્ ॥ ૫॥

કિં વર્ણયામ તવ રૂપમચિન્ત્યમેતત્
કિં ચાતિવીર્યમસુરક્ષયકારિ ભૂરિ ।
કિં ચાહવેષુ ચરિતાનિ તવાદ્ભુતાનિ
સર્વેષુ દેવ્યસુરદેવગણાદિકેષુ ॥ ૬॥

હેતુઃ સમસ્તજગતાં ત્રિગુણાપિ દોષૈ-
ર્ન જ્ઞાયસે હરિહરાદિભિરપ્યપારા ।
સર્વાશ્રયાખિલમિદં જગદંશભૂત-
મવ્યાકૃતા હિ પરમા પ્રકૃતિસ્ત્વમાદ્યા ॥ ૭॥

યસ્યાઃ સમસ્તસુરતા સમુદીરણેન
તૃપ્તિં પ્રયાતિ સકલેષુ મખેષુ દેવિ ।
સ્વાહાસિ વૈ પિતૃગણસ્ય ચ તૃપ્તિહેતુ-
રુચ્ચાર્યસે ત્વમત એવ જનૈઃ સ્વધા ચ ॥ ૮॥

યા મુક્તિહેતુરવિચન્ત્યમહાવ્રતા ત્વં
અભ્યસ્યસે સુનિયતેન્દ્રિયતત્ત્વસારૈઃ ।
મોક્ષાર્થિભિર્મુનિભિરસ્તસમસ્તદોષૈ-
ર્વિદ્યાસિ સા ભગવતી પરમા હિ દેવિ ॥ ૯॥

શબ્દાત્મિકા સુવિમલર્ગ્યજુષાં નિધાન-
મુદ્ગીથરમ્યપદપાઠવતાં ચ સામ્નામ્ ।
દેવી ત્રયી ભગવતી ભવભાવનાય
વાર્ત્તા ચ સર્વજગતાં પરમાર્ત્તિ હન્ત્રી ॥ ૧૦॥

મેધાસિ દેવિ વિદિતાખિલશાસ્ત્રસારા
દુર્ગાસિ દુર્ગભવસાગરનૌરસઙ્ગા ।
શ્રીઃ કૈટભારિહૃદયૈકકૃતાધિવાસા
ગૌરી ત્વમેવ શશિમૌલિકૃતપ્રતિષ્ઠા ॥ ૧૧॥

ઈષત્સહાસમમલં પરિપૂર્ણચન્દ્ર-
બિમ્બાનુકારિ કનકોત્તમકાન્તિકાન્તમ્ ।
અત્યદ્ભુતં પ્રહૃતમાત્તરુષા તથાપિ
વક્ત્રં વિલોક્ય સહસા મહિષાસુરેણ ॥ ૧૨॥

દૃષ્ટ્વા તુ દેવિ કુપિતં ભ્રુકુટીકરાલ-
મુદ્યચ્છશાઙ્કસદૃશચ્છવિ યન્ન સદ્યઃ ।
પ્રાણાન્મુમોચ મહિષસ્તદતીવ ચિત્રં
કૈર્જીવ્યતે હિ કુપિતાન્તકદર્શનેન ॥ ૧૩॥

દેવિ પ્રસીદ પરમા ભવતી ભવાય
સદ્યો વિનાશયસિ કોપવતી કુલાનિ ।

વિજ્ઞાતમેતદધુનૈવ યદસ્તમેત-
ન્નીતં બલં સુવિપુલં મહિષાસુરસ્ય ॥ ૧૪॥

તે સમ્મતા જનપદેષુ ધનાનિ તેષાં
તેષાં યશાંસિ ન ચ સીદતિ ધર્મવર્ગઃ ।
ધન્યાસ્ત એવ નિભૃતાત્મજભૃત્યદારા
યેષાં સદાભ્યુદયદા ભવતી પ્રસન્ના ॥ ૧૫॥

ધર્મ્યાણિ દેવિ સકલાનિ સદૈવ કર્મા-
ણ્યત્યાદૃતઃ પ્રતિદિનં સુકૃતી કરોતિ ।
સ્વર્ગં પ્રયાતિ ચ તતો ભવતીપ્રસાદા-
લ્લોકત્રયેઽપિ ફલદા નનુ દેવિ તેન ॥ ૧૬॥

દુર્ગે સ્મૃતા હરસિ ભીતિમશેષજન્તોઃ
સ્વસ્થૈઃ સ્મૃતા મતિમતીવ શુભાં દદાસિ ।
દારિદ્ર્યદુઃખભયહારિણિ કા ત્વદન્યા
સર્વોપકારકરણાય સદાઽઽર્દ્રચિત્તા ॥ ૧૭॥

એભિર્હતૈર્જગદુપૈતિ સુખં તથૈતે
કુર્વન્તુ નામ નરકાય ચિરાય પાપમ્ ।
સઙ્ગ્રામમૃત્યુમધિગમ્ય દિવં પ્રયાન્તુ
મત્વેતિ નૂનમહિતાન્વિનિહંસિ દેવિ ॥ ૧૮॥

દૃષ્ટ્વૈવ કિં ન ભવતી પ્રકરોતિ ભસ્મ
સર્વાસુરાનરિષુ યત્પ્રહિણોષિ શસ્ત્રમ્ ।
લોકાન્પ્રયાન્તુ રિપવોઽપિ હિ શસ્ત્રપૂતા
ઇત્થં મતિર્ભવતિ તેષ્વપિ તેઽતિસાધ્વી ॥ ૧૯॥

ખડ્ગપ્રભાનિકરવિસ્ફુરણૈસ્તથોગ્રૈઃ
શૂલાગ્રકાન્તિનિવહેન દૃશોઽસુરાણામ્ ।
યન્નાગતા વિલયમંશુમદિન્દુખણ્ડ-
યોગ્યાનનં તવ વિલોકયતાં તદેતત્ ॥ ૨૦॥

દુર્વૃત્તવૃત્તશમનં તવ દેવિ શીલં
રૂપં તથૈતદવિચિન્ત્યમતુલ્યમન્યૈઃ ।
વીર્યં ચ હન્ત્રિ હૃતદેવપરાક્રમાણાં
વૈરિષ્વપિ પ્રકટિતૈવ દયા ત્વયેત્થમ્ ॥ ૨૧॥

કેનોપમા ભવતુ તેઽસ્ય પરાક્રમસ્ય
રૂપં ચ શત્રુભયકાર્યતિહારિ કુત્ર ।
ચિત્તે કૃપા સમરનિષ્ઠુરતા ચ દૃષ્ટા
ત્વય્યેવ દેવિ વરદે ભુવનત્રયેઽપિ ॥ ૨૨॥

ત્રૈલોક્યમેતદખિલં રિપુનાશનેન
ત્રાતં ત્વયા સમરમૂર્ધનિ તેઽપિ હત્વા ।
નીતા દિવં રિપુગણા ભયમપ્યપાસ્ત-
મસ્માકમુન્મદસુરારિભવં નમસ્તે ॥ ૨૩॥

શૂલેન પાહિ નો દેવિ પાહિ ખડ્ગેન ચામ્બિકે ।
ઘણ્ટાસ્વનેન નઃ પાહિ ચાપજ્યાનિઃસ્વનેન ચ ॥ ૨૪॥

પ્રાચ્યાં રક્ષ પ્રતીચ્યાં ચ ચણ્ડિકે રક્ષ દક્ષિણે ।
ભ્રામણેનાત્મશૂલસ્ય ઉત્તરસ્યાં તથેશ્વરિ ॥ ૨૫॥

સૌમ્યાનિ યાનિ રૂપાણિ ત્રૈલોક્યે વિચરન્તિ તે ।
યાનિ ચાત્યર્થઘોરાણિ તૈ રક્ષાસ્માંસ્તથા ભુવમ્ ॥ ૨૬॥

ખડ્ગશૂલગદાદીનિ યાનિ ચાસ્ત્રાનિ તેઽમ્બિકે ।
કરપલ્લવસઙ્ગીનિ તૈરસ્માન્રક્ષ સર્વતઃ ॥ ૨૭॥

ઋષિરુવાચ ॥ ૨૮॥

એવં સ્તુતા સુરૈર્દિવ્યૈઃ કુસુમૈર્નન્દનોદ્ભવૈઃ ।
અર્ચિતા જગતાં ધાત્રી તથા ગન્ધાનુલેપનૈઃ ॥ ૨૯॥

ભક્ત્યા સમસ્તૈસ્ત્રિદશૈર્દિવ્યૈર્ધૂપૈસ્તુ ધૂપિતા ।
પ્રાહ પ્રસાદસુમુખી સમસ્તાન્ પ્રણતાન્ સુરાન્ ॥ ૩૦॥

દેવ્યુવાચ ॥ ૩૧॥

વ્રિયતાં ત્રિદશાઃ સર્વે યદસ્મત્તોઽભિવાઞ્છતમ્ ॥ ૩૨॥

દેવા ઉચુઃ ॥ ૩૩॥

ભગવત્યા કૃતં સર્વં ન કિઞ્ચિદવશિષ્યતે ।
યદયં નિહતઃ શત્રુરસ્માકં મહિષાસુરઃ ॥ ૩૪॥

યદિ ચાપિ વરો દેયસ્ત્વયાઽસ્માકં મહેશ્વરિ ।

સંસ્મૃતા સંસ્મૃતા ત્વં નો હિંસેથાઃ પરમાપદઃ ॥ ૩૫॥

યશ્ચ મર્ત્યઃ સ્તવૈરેભિસ્ત્વાં સ્તોષ્યત્યમલાનને ॥ ૩૬॥

તસ્ય વિત્તર્દ્ધિવિભવૈર્ધનદારાદિસમ્પદામ્ ।
વૃદ્ધયેઽસ્મત્પ્રસન્ના ત્વં ભવેથાઃ સર્વદામ્બિકે ॥ ૩૭॥

ઋષિરુવાચ ॥ ૩૮॥

ઇતિ પ્રસાદિતા દેવૈર્જગતોઽર્થે તથાઽત્મનઃ ।
તથેત્યુક્ત્વા ભદ્રકાલી બભૂવાન્તર્હિતા નૃપ ॥ ૩૯॥

ઇત્યેતત્કથિતં ભૂપ સમ્ભૂતા સા યથા પુરા ।
દેવી દેવશરીરેભ્યો જગત્ત્રયહિતૈષિણી ॥ ૪૦॥

પુનશ્ચ ગૌરીદેહાત્સા સમુદ્ભૂતા યથાભવત્ ।
વધાય દુષ્ટદૈત્યાનાં તથા શુમ્ભનિશુમ્ભયોઃ ॥ ૪૧॥

રક્ષણાય ચ લોકાનાં દેવાનામુપકારિણી ।
તચ્છૃણુષ્વ મયાઽઽખ્યાતં યથાવત્કથયામિ તે ॥ ૪૨॥

ઇતિ શ્રી માર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
શક્રાદિસ્તુતિર્નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥